# ॥ चन्द्राष्टविंशतिनामस्तोत्रम् ॥

चन्द्रस्य शृणु नामानि शुभदानि महीपते।
यानि श्रुत्वा नरो दुःखान्मुच्यते नात्र संशयः॥ १ ॥

सुधाकरो विधुः सोमो ग्लौरब्जः कुमुदप्रियः।
लोकप्रियः शुभ्रभानुश्चन्द्रमा रोहिणीपतिः॥ २ ॥

शशी हिमकरो राजा द्विजराजो निशाकरः।
आत्रेय इन्दुः शीतांशुरोषधीशः कलानिधिः॥ ३ ॥

जैवातृको रमाभ्राता क्षीरोदार्णवसम्भवः।
नक्षत्रनायकः शम्भुशिरश्चूडामणिर्विभुः॥ ४ ॥

तापहर्ता नभोदीपो नामान्येतानि यः पठेत्।
प्रत्यहं भक्तिसंयुक्तस्तस्य पीडा विनश्यति॥ ५ ॥

तद्दिने च पठेद्यस्तु लभेत्सर्वं समीहितम्।
ग्रहादीनां च सर्वेषां भवेच्चन्द्रबलं सदा॥ ६ ॥

॥ इति श्री-चन्द्राष्टविंशतिनामस्तोत्रं सम्पूर्णम् ॥

This stotra can be accessed in multiple scripts at:
http://stotrasamhita.net/wiki/Chandra_Ashtavimshati_Nama_Stotram.
generated on **August 16, 2026**
Downloaded from http://stotrasamhita.github.io | StotraSamhita | Credits